दिनाङ्क :- 20.08.2026

प्रातः - 06:55

**मन्त्रिमण्डलम् - परियोजनाः**

केन्द्रीयमन्त्रिमण्डलेन ह्यः नवदिल्ल्यां सम्पन्नोपवेशनानन्तरं त्रयोदशसहस्र-कोटिरूप्यकाधिकाः पञ्चपरियोजनाः अनुमोदिताः। एतासु चतस्रः रेलमार्गसम्बद्धाः एका च राजमार्गसम्बद्धा परियोजना अस्ति। सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः उक्तवान् यत् केन्द्रीयमन्त्रिमण्डलेन पश्चिमबङ्गाल-ओडिशा-तमिलनाडु-आन्ध्रप्रदेश इत्येतेषु चतुर्षु राज्येषु रेलमार्गस्य अष्टबहुमार्गीय-परियोजनाः अनुमोदिताः। असौ उक्तवान् यत् आहत्य पञ्चाशदधिक-चतुश्शताधिक-नवसहस्र-कोटिरूप्यकाणां व्ययेन एताः परियोजनाः त्रिंशदधिक-द्विसहस्रतमवर्षाद् एकत्रिंशदधिक-द्विसहस्रतम-वर्षपर्यन्तं पूर्णाः करिष्यन्ते।

श्रीवैष्णवः सूचितवान् यत् मन्त्रिमण्डलेन बिहारराज्ये मुजफ्फरपुर–सीतामढी–सोनबरसा-खण्डस्य राष्ट्रिय-राजमार्ग-द्वाविंशतिः इत्यस्य चतुर्मार्गीयमानकानुसारम् उन्नयनमपि अनुमोदितम्। अस्य व्ययः आहत्य नवत्यधिक-पञ्चशताधिक-त्रिसहस्र-कोटिरूप्यकाधिकः अस्ति।

**राजनाथः - जापानस्य रक्षामन्त्री**

रक्षामन्त्री राजनाथसिंहः अद्य नवदिल्ल्यां जापानस्य रक्षामन्त्रिणा शिञ्जिरो कोइजुमि इत्यमुना सह द्विपाक्षिकोपवेशनं करिष्यति। अपेक्ष्यते यत् अस्मिन् उपवेशने हिन्द-प्रशान्तक्षेत्रे रणनीतिकविश्वासः सहयोगश्च अधिकं सुदृढौ भविष्यतः तथा स्थिरतायाः सुरक्षायाश्च प्रवर्धनं भविष्यति। उभौ मन्त्रिणौ सामुद्रिकसुरक्षाक्षेत्रे गहनसहयोगस्य, अथ 'मेक् इन् इण्डिया' इत्यस्य च अन्तर्गतं रक्षोपकरणानां प्रौद्योगिक्याश्च क्षेत्रे अधिकनिकट-सहयोगस्य विषये विचाराणाम् आदानप्रदानं करिष्यतः।

**रिजिजू - अरुणाचलप्रदेशः**

सामाजिकसञ्चारपटले प्रकाशिते एकस्मिन् सन्देशे श्रीरिजिजूः उक्तवान् यत् बाङ्ग्लादेशस्य छायाचित्राणि दृश्यचित्राणि च चीनदेशस्य अरुणाचलप्रदेशे प्रवेशं मिथ्यारूपेण प्रदर्शयितुं प्रयुज्यन्ते। असौ उक्तवान् यत् एतादृशानि असत्यानि अभिकथनानि सीमां रक्षतां सैनिकानां मनोबलं न्यूनीकर्तुं शक्नुवन्ति तथा अनावश्यकं भ्रमं जनयितुं शक्नुवन्ति। मन्त्री उक्तवान् यत् भारत-चीनसीमा-सम्बद्धः विषयः गम्भीरः अस्ति। सः जनान् आहूतवान् यत् एतादृशे संवेदनशीलविषये मिथ्यानि उत वा अप्रमाणितानि कथनानि न कुर्वन्तु।

**दिल्ली - विशेषगहनपुनरीक्षणम्**

दिल्ल्यां प्रचलितस्य विशेषगहनपुनरीक्षणस्य अन्तर्गतम् आवेदनपत्राणाम् उपस्थापनस्य अन्तिमतिथिः अस्य मासस्य चतुर्विंशति-दिनाङ्कं यावत् वर्धिता। दिल्ल्याः मुख्यनिर्वाचनाधिकारिणः अनुसारम् अधुना प्रारूपमतदातृसूची अस्य मासस्य एकत्रिंशत्-दिनाङ्के प्रकाशिता भविष्यति। अभ्यर्थनानाम् आक्षेपानां च प्रस्तुतेः अन्तिमतिथिः आगामिमासस्य त्रिंशत्-दिनाङ्कं भविष्यति।

एतेषाम् अभ्यर्थनानाम् आक्षेपानां च निवारणप्रक्रिया अक्टूबर्-मासस्य एकत्रिंशत्-दिनाङ्कं यावत् पूर्णा करिष्यते। ततः नवम्बर्-मासस्य चतुर्थ-दिनाङ्कं यावत् अन्तिममतदातृसूची प्रकाशिता भविष्यति।

**बाङ्ग्लादेशः - राष्ट्रपतिनिर्वाचनम्**

बाङ्ग्लादेशे अद्य राष्ट्रपतिपदाय निर्वाचनं भविष्यति। अस्मिन् निर्वाचने सांसदाः शासनाधिरूढस्य बी.एन.पी.दलस्य वरिष्ठनेता मिर्जा फखरुल् इस्लाम् आलमगीर् तथा एकादश-दलात्मकस्य विपक्षसंयुतेः प्रत्याशी कर्नल् ओली अहमद् इत्येतयोः मध्ये चयनं करिष्यन्ति। पञ्चत्रिंशत्-वर्षाणाम् अनन्तरं प्रथमवारं राष्ट्रपतिपदाय निर्वाचने मतदानं भविष्यति। मतदानम् अद्य अपराह्ने द्विवादनात् आरभ्य सायं पञ्चवादनपर्यन्तं संसद्भवने भविष्यति।

**बैड्मिण्टन्**

बैड्मिण्टन्-क्रीडायाम् अद्य भारतीयाः क्रीडकाः नवदिल्ल्याः इन्दिरागान्धी-इण्डोर-क्रीडाङ्गणे आयोज्यमानायां बीडब्ल्यूएफ्-विश्वस्पर्धायां क्रीडिष्यन्ति। भारतस्य क्रीडिका अथ पूर्वविश्वविजेत्री च पी. वी. सिन्धुः महिलानाम् एकलवर्गे तृतीयक्रमाङ्कितया चीनदेशीयया वाङ् झी यी इत्यनया सह स्पर्धिष्यते। भारतस्य क्रीडकः आयुषशेट्टी पुरुषाणाम् एकलवर्गे इण्डोनेशियादेशस्य एकादशक्रमाङ्कितेन अल्वी फरहान् इत्यनेन सह स्पर्धिष्यते।

।। **इति वार्ताः**।।